(“गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत् ।
कफघ्नी रुचिकृल्लघ्वी दीपनी बलवीर्य्यकृत् ॥”
इति शब्दार्थचिन्तामणिधृतवचनम् ॥

गरं संसारयातनारूपं विषं हन्तीति । हन् + टक् ङीप् च । गङ्गा । यथा, काशीखण्डे । २९।५४।
“ग्रहपीड़ाहरा गुन्द्रा गरघ्नी गानवत्सला ॥”)

गरणं, क्ली, (गृ सेचने गॄ निगरणे + भावे ल्युट् ।) सेचनम् । निगरणम् । इति व्याकरणम् ॥

गरदं, क्ली, (गॄ + भावे अप् । गरो भक्षणम् । गरेण भक्षणेन दीयते खण्ड्यते म्रियतेऽस्मादनेन वा । दो + अपादाने करणे वा घञर्थे कः ।) विषम् । इति राजनिर्घण्टः ॥

गरदः, त्रि, (गरं विषं ददातीति । दा + कः ।) विषदानकर्त्ता । (अयं हि आततायिनामन्यतमः । अस्य हनने दण्डादिकं नास्ति ।) यथा, स्मृतिः ।
“अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।”
(अयं हि श्राद्धभोजने परिहर्त्तव्यः । तथा च मनौ । ३ । १५८ ।
“ आगारदाही गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥”)

गरव्रतः, पुं, (गरो गरणं सर्पादिग्रसनरूपं व्रतं नैसर्गिको नियमो यस्य ।) मयूरः । इति शब्दरत्नावली ॥

गरभः, पुं, (गॄ + बाहुलकात् अभच् ।) गर्भः । इति हेमचन्द्रः । ३।२०४ ॥

गरलं, क्ली, (गिरति ग्रसति नाशयतीत्यर्थः । गॄ + अलच् । गरात् भक्षणात् लाति आदत्ते जीवनं वा । ला + कः ।) विषम् । इत्यमरः । १।८।९ ॥ (यथा, गीतगोविन्दे ४ । २ ।
“व्यालनिलयमिलनेन गरलमिव कलयति
मलयसमीरम् ॥”)
पन्नगविषम् । परिमाणम् । तृणपूलकम् । इति हेमचन्द्रः ॥ घासेर गड्डा पुला आटि इत्यादि भाषा ॥

गरलारिः, पुं, (गरलस्य विषस्य अरिः तन्नाशकत्वात्तथात्वम् ।) मरकतमणिः । इति राजनिर्घण्टः ॥

गरा, स्त्री, (गीर्य्यते भक्ष्यते औषधार्थं रोगिभिरिति शेषः । गॄ + कर्म्मण्यप् । ततोऽजादित्वात् टाप् ।) देवदालीलता । इति राजनिर्घण्टः ॥ निगरणम् । इति धरणी ॥

गरागरी, स्त्री, (गरं विषं आगिरति नाशयतीति । गरं मूषिकविषमित्येके । आ + गॄ अप् । संज्ञायां जातौ वा ङीष् ।) देवताड़वृक्षः । इत्यमरटीकायां स्वामी ॥ (यथास्याः पर्य्यायाः ।
“गरागरी च वेणी च तथा स्याद्देवताड़कः ।”
इति कल्पस्थाने द्वितीयेऽध्याये चरकेणोक्तम् ॥
गुणाश्चास्या जीमूतकशब्दे ज्ञातव्याः ॥)

गरात्मकं, क्ली, (गरः विषं आत्मा बीजभूतं यस्य इति कप् ।) शोभाञ्जनबीजम् । इति शब्दचन्द्रिका ॥

गराधिका, स्त्री, (गरेषु गरप्रतीकारादिषु अधिका प्रधाना ।) लाक्षा । इति रत्नमाला । गराधिका गवाधिकापि पाठः ॥ (गरादधिका । विषप्रधाना ॥)

गरिमा, [न्] त्रि, (“प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धेति ।” ६ । ४ । १५७ । इति गरादेशः । पृथ्वादिभ्य इमनिज्वा ।” ५ । १ । १२२ । इति इमनिच् ।) गुरुता । इति व्याकरणम् ॥ (यथा, भागवते । ८ । २ । २२ ।
“गिरिं गरिम्णा परितः प्रकम्पयन् ॥
निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥ ”)

गरिष्ठः, त्रि, (अतिशयेन गुरुः । “प्रियस्थिरेति ।” ६।४।१५७ । इति इष्ठन् गरादेशश्च ।) अतिगुरुः । इति जटाधरः ॥ (पुं, दानवविशेषः । यथा, महाभारते । १ । ६५ । ३० ।
“गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥”
नृपविशेषः । यथा, तत्रैव । २।७।१२ ।
“हविर्घ्नश्च गरिष्ठश्च हरिश्चन्द्रश्च पार्थिवः ॥”)

गरी, स्त्री, (गर + जातौ संज्ञायां वा ङीष् ।) देवताड़वृक्षः । इत्यमरः । २ । ४ । ९९ ॥ खरा । इति मेदिनी । रे । २२ ॥ (देवताड़शब्देऽस्या विवरणं बोद्धव्यम् ॥)

गरीयान्, [स्] त्रि, (अतिशयेन गुरुः । गुरु + इयसुन् गरादेशश्च ।) अतिगुरुः । इति व्याकरणम् ॥

गरुड़ः, पुं, (गरुद्भ्यां पक्षाभ्यां डयते उड्डयते । इति गरुत् + डी + डः । पृषोदरात् तलोपे साधुः । यद्वा, “गिर उड़च् ।” उणां ४ । १५५ । इति उड़च् ।) स्वनामख्यातपक्षी । तत्पर्य्यायः । गरुत्मान् २ तार्क्ष्यः ३ वैनतेयः ४ खगेश्वरः ५ नागान्तकः ६ विष्णुरथः ७ सुपर्णः ८ पन्नगाशनः ९ । इत्यमरः । २ । २ । ३२ ॥ महावीरः १० पक्षिसिंहः ११ उरगाशनः १२ । इति जटाधरः ॥ शाल्मली १३ हरिवाहनः १४ अमृताहरणः १५ नागाशनः १६ । इति हारावली ॥ शाल्मलिस्थः १७ खगेन्द्रः १८ भुजगान्तकः १९ तरस्वी २० तार्क्ष्यनायकः २१ । इति राजनिर्घण्टः ॥*॥ तस्योत्पत्तिकारणं यथा,—
“यजतः पुत्त्रकामस्य कश्यपस्य प्रजापतेः ।
साहाय्यमृषयो देवा गन्धर्व्वाश्च ददुः किल ॥
तत्रेध्मानयने शक्रो नियुक्तः कश्यपेन ह ।
मुनयो वालिखिल्याश्च ये चान्ये देवतागणाः ॥
शक्रस्तु वीर्य्यसदृशमिध्मभारं गिरिप्रभम् ।
समुत्क्षिप्यानयामास नातिकृच्छ्रादिव प्रभुः ॥
अथापश्यदृषीन् ह्रस्वानङ्गुष्ठोदरवर्ष्मणः ।
पलाशवृन्तिकामेकां सहितान् वहतः पथि ॥
तान् सर्व्वान् विस्मयाविष्टो वीर्य्योन्मत्तः पुरन्दरः ।
अवहस्याभ्ययाच्छीघ्रं लङ्घयित्वावमन्य च ॥
तेऽथ रोषसमाविष्टाः सुभृशं जातमन्यवः ।
आरेभिरे महत् कर्म्म तदा शक्रभयङ्करम् ॥
कामवीर्य्यः कामगमो देवराजभयप्रदः ।
इन्द्रोऽन्यो सर्व्वदेवानां भवेदिति यतव्रताः ॥
तद्बुद्ध्वा भृशसन्तप्तो देवराजः शतक्रतुः ।
जगाम शरणं तत्र कश्यपं शंसितव्रतम् ॥
तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः ।
वालिखिल्यानुपागम्य कर्म्मसिद्धिमपृच्छत ॥
अथ ते तं महात्मानं प्रत्यूचुः सत्यवादिनः ।
तान् कश्यप उवाचेदं सान्त्वपूर्व्वं प्रजापतिः ॥”
तस्य पक्षीन्द्रत्वकारणं यथा,—
“अयमिन्द्रस्त्रिभुवने नियोगात् ब्रह्मणः कृतः
इन्द्रार्थञ्च भवन्तोऽपि यत्नवन्तस्तपोधनाः ॥
न मिथ्या ब्रह्मणो वाक्यं कर्त्तुमर्हथ सत्तमाः ।
भवतां हि न मिथ्यायं संकल्पो वै चिकीर्षितः ॥
भवत्वेष पतत्त्रीणामिन्द्रोऽतिबलसत्त्ववान् ।
प्रसादः क्रियतामस्य देवराजस्य याचतः ॥
वालिखिल्या ऊचुः ।
अपत्यार्थं समारम्भो भवतश्चायमीप्सितः ।
तथा चैवं विधत्स्वात्र यथाश्रेयोऽनुपश्यसि ॥
एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा ।
विनता नाम कल्याणी पुत्त्रकामा यशस्विनी ॥
तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः ।
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः ॥
आरम्भः सफलो देवि ! भवितायं तवेप्सितः ।
जनयिष्यसि पुत्त्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ॥
तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा ।
एतौ सर्व्वपतत्त्रीणामिन्द्रत्वं कारयिष्यतः ॥
विनता चापि सिद्धार्था बभूव मुदिता तथा ।
जनयामास पुत्त्रौ द्वावरुणं गरुड़ं तथा ॥
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः ।
पतत्त्रीणान्तु गरुड़ इन्द्रत्वेनाभ्यषिच्यत ॥”*॥
तस्य जन्मकालीनरूपं यथा,—
“एतस्मिन्नन्तरे चापि गरुड़ः काल आगते ।
विना मात्रा महातेजा विदार्य्याण्डमजायत ।
महासत्त्वबलोपेतः सर्व्वा विद्योतयन्दिशः ।
कामरूपी कामगमः कामवीर्य्यो विहङ्गमः ॥
अग्निराशिरिवोद्भासन् समिद्धोऽतिभयङ्करः ।
विद्युद्विस्पष्टपिङ्गाक्षो युगान्ताग्निसमप्रभः ॥
प्रवृद्धः सहसा पक्षी महाकायो नभो गतः ।
घोरो घोरस्वनो रौद्रो वह्निरौर्व्व इवापरः ॥”*॥
तस्य विष्णुवाहनत्वे कारणं यथा,—
“अपीत्वा चामृतं पक्षी परिगृह्याशु निःसृतः ।
अगच्छदपरिश्रान्त आवार्य्यार्कप्रभां खगः ॥
विष्णुना तु तदाकाशे वैनतेयः समेयिवान् ।
तस्य नारायणस्तुष्टस्तेनालौल्येन कर्म्मणा ॥
तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम् ।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः ॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः ।
अजरश्चामरश्चास्याममृतेन विनाप्यहम् ।
एवमस्त्विति तं विष्णुरुवाच विनतासुतम् ॥
प्रतिगृह्य वरौ तौ तु गरुड़ो विष्णुमब्रवीत् ।
भवतेऽपि वरं दद्मि वृणोतु भगवानपि ॥
तं वव्रे वाहनं कृष्णो गरुत्मन्तं महाबलम् ।
ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम् ॥”
इति महाभारते । १ । २१-३३ । अध्यायेषु ॥